श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवादिराजयति विरचिता

# ॥ श्रीहयग्रीवस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीहयग्रीवस्तुतिः ॥

लसदास्य हयग्रीव लसदोष्ठद्वयारुण।
लसद्दन्तावलीशोभ हयग्रीवलसत्स्मित॥ १ ॥

लसत्फाल हयग्रीव लसत्कुन्तलमस्तक।
लसत्कर्ण हयग्रीव लसन्नयनपङ्कज॥ २ ॥

लसद्वीक्ष हयग्रीव लसद्भ्रूमण्डलद्वय।
लसद्ग्रीव हयग्रीव लसद्धस्तलसद्भुज॥ ३ ॥

लसत्पार्श्व लसत्पृष्ठ कक्षांसयुगसुन्दर।
हयग्रीव लसद्वक्षः स्तनमध्यवलित्रय॥ ४ ॥

हयग्रीव लसत्कुक्षे लसद्रोमलताञ्चित।
हयग्रीव लसन्नाभे लसत्कटियुगान्तर॥ ५ ॥

लसदूरो हयग्रीव लसज्जानुयुगप्रभ।
हयग्रीव लसज्जङ्घायुग्म पादाम्बुजद्वय॥ ६ ॥

हयग्रीव लसत्पादतलरेखारुणद्युते।
लसन्नखाङ्गुलीशोभ हयग्रीवातिसुन्दर॥ ७ ॥

लसत्किरीटकेयूर कङ्कणाङ्गदकुण्डल।
हयग्रीव लसद्रत्नहारकौस्तुभमण्डन॥ ८ ॥

हयग्रीव लसन्मध्य लसच्चन्दनचर्चित।
लसद्रत्नमयाकल्प श्रीवत्सकृतभूषण॥ ९ ॥

हयग्रीव लसत्काञ्चीरत्नकिङ्किणिमेखल।
हयग्रीव लसद्वस्त्र मणिनूपुरमण्डित॥ १० ॥

www.prapatti.com

हयग्रीवेन्दुबिम्बस्थ लसच्छङ्खाक्षपुस्तक।
लसन्मुद्र हयग्रीव लसदिन्दुसमद्युते॥ ११ ॥

हयग्रीव रमाहस्तरत्नकुम्भसृतामृत।
हयग्रीव समानश्रीचतुरूपोपसेवित॥ १२ ॥

हयग्रीव सुरश्रेष्ठ हयग्रीव सुरप्रिय।
हयग्रीव सुराराध्य जयशिष्टजयेष्टद॥ १३ ॥

हयग्रीव महावीर्य हयग्रीव महाबल।
हयग्रीव महाधैर्य जयदुष्टविनष्टिद॥ १४ ॥

भयं मृत्युं क्षयं व्यर्थव्ययं नानामयं च मे।
हरे संहर दैत्यारे हरे नरहरे यथा॥ १५ ॥

भक्तिं शक्तिं विरक्तिं च भुक्तिं मुक्तिं च युक्तिद।
हरे मे देहि दैत्यारे हरे नरहरे यथा॥ १६ ॥

सदा सर्वेष्टलाभाय सर्वानिष्टनिवृत्तये।
हयग्रीवस्तुतिः पाठ्या वादिराजयतीरिता॥ १७ ॥

चिन्तामणिर्हयग्रीवो वशेयस्यनिषेवितः।
सोऽपि सर्वार्थदो नृणां किमुतासौ हयाननः॥ १८ ॥

॥ इति श्रीहयग्रीवस्तुतिः सम्पूर्णा ॥

www.prapatti.com